## ।। अथ सप्तदशोऽध्याय: ।। Chapter-17

वसिष्ठ उवाच :- ततो ब्रह्मसरो गच्छेद् ब्रह्मणा निर्मितंपुरा ।
यत्र स्नात्वा च पीत्वा च मुच्यते पातकैर्नर: ।। १

पूर्वमेकार्णवीभूते नष्टे स्थावरजंगमे ।
जनलोकं यदा प्राप्ता महर्ल्लोकनिवासिन: ।। २

संहृत्य सर्वभूतानि स्थावराणि चराणि च ।।
महार्णवजलोत्सङ्गे सुष्वाप कमलोद्भव: ।। ३

चतुर्युगसहस्त्राणि सुप्त्वा लोकपितामह: ।।
प्रबुद्ध: परिबभ्राम दिदृक्षु: किमपि स्थितम् ।। ४

स्वशरीरजतेजोभिरन्धकारमिवाऽक्षिपत् ।।
नवनीलमणिप्रख्यान् ददर्श पुरतो रुच: ।। ५

महांसि निजदेहस्य प्रत्यावृत्तानि भूरिश: ।।
वीक्ष्याथ चिन्तयामास किमेतदिति लोककृत् ।। ६

-०-

ई बी १ सरे, बी २ निर्मित, ई बी ३ मुच्यपातकैर्नर:,
बी ४ पू - ए पर्व, ए निर्मितंपूरा, ए- त्वक्पीत्वा , बी ५- वा
ई बी ६ महर्लोकभयात्प्राप्ते जनलोकनरेश्वर ए मयाप्राप्ता
बी ७ किमपिस्थितं
ई बी ८ न
ई बी ६ मेतदि
(ए१) मयात्
(ए२) ददर्श
(ए३) ता

अस्मिन् चराचरे नष्टे सर्वतः समप्लुतोदके ।
मां विना कः पदार्थोऽयं यस्येदं दृश्यते महः ।। ७

भूतानामहमेकोऽस्मि प्रलयोत्पविकारणम् ।।
तत्कोऽयमवशिष्टोऽभूयो वै नज्ञायते मया ।। ८

इति चिंतयतस्तस्य ब्रह्मणो व्यक्तजन्मनः ।।
प्रादुरासीन् महीपाल शङ्खचक्रगदाधरः ।। ९

नीलोत्पलदलश्यामः प्रबुद्धकमलेक्षणः ।।
पीताम्बरधरो देवो मुकुटोद्भासिताम्बरः ।।
परापराणां परमः पुराणः परमेश्वरः ।। १०

तं निरीक्ष्याभिदुद्राव वेगेन जगतांपतिम् ।।
कौसिकोसीतिविक्रुष्यन्नभिमर्षात् पितामह ।। ११

तमेवं वादिनं दृष्ट्वा त्वरमाणं चतुर्मुखम् ।।
सज्जीकृत्य करे चक्रं प्रहस्य प्राह केशवः ।। १२

-०-

ई बी १ भूतना, बी २ पुराण परमेश्वर ई - पुराण परमेश्वरः
ई बी ३ का, ई बी ४ भै, जी ५ कुकरे

(ए१) सिष्टोभू
(ए२) न्नाभिमर्षात्पितामहः

श्री भगवानुवाच:- अहमेक: पुमान् लोके लोकानां सृष्टिकारक: ।
अहमेव युगस्यान्ते संक्षिपामि चराचरम् ।। १३

हिरण्यकशिपुमुख्या दैत्या येन सहस्त्रश: ।।
लोकहेतो रणे ध्वस्तास्त्वं मां जानासि नो हरिम् ।। १४

ब्रह्मोवाच :- धातारं सर्वलोकानां वेदानामाश्रयं परं ।
वचसानुभवं मूढ न त्वं मां क्षिप्तुमर्हसि ।। १५

विष्णुरुवाच:- भाषसे बहुकसम्बद्धमसह्यमिहमानिनां ।।
चतुर्मुखं गृहाणास्त्रं यावच्चक्रं न धावति ।। १६

वसिष्ठ उवाच :- तत: प्रववृते युद्धं तदानीं राजसत्तम ।।
सम्वत्सरशतं साग्रं तयोस्त्रैलोकनाथयो: ।। १७

न ग्लानिर्न च निर्वेदो यदा कस्याप्यजायत ।
ततो राजंस्तयोर्मध्ये लिंगमाविरभून्महत् ।। १८

अम्भोदध्वनिगम्भीरा व्योम्नि दिव्या च भारती ।। १९

-०-०-

ई बी १ वो १ ई ते
ई बी २ पर:
ई बी ३ साबु ३(१)ए महु
ई बी ४ मार्हति
बी ५ म:

श्लोक

(ए१) वचनानुभवं
(ए२) महुसम्बधं
(ए३) भारति:

वागुवाच :- भोभो ब्रह्मन् हृषीकेश[ए१] न योद्धव्यं कथंचन ।
प्राप्स्यते योऽस्य लिंगस्य प्रान्तं स प्रवरो हि वाम्[ए२] ।। २०

वसिष्ठ उवाच :- एवं निशम्य तौ राजन् जनार्दनचतुर्मुखौ ।।
अधश्चोर्ध्वं च वेगेन द्रष्टुं[ए३] लिंगमधावताम् ।। २१

चक्रेण सप्तपातालान् भित्त्वाप्याहत्य केशवः ।
नोपश्यत् प्रान्तमीशस्य लिंगपार्श्वमुपाविशत् ।। २२

अपि वर्षाण्यनेकानि गत्वोर्ध्वं[ए४] कमलोद्भवः ।
निवृत्तः सह हंसेन मालामादाय मार्गतः ।। २३

तत्रागतो महीपाल ददर्श मधुसूदनम् ।।
लिंगपार्श्वे ह्युपासीनमीशानस्तुतितत्परम् ।। २४

ब्रह्मोवाच :- दृष्टः प्रान्तो महेशस्य मया व्योमगतेन वै ।
अभिज्ञानमिदं कृष्ण पुष्पमालाकृतोरसि ।। २५

-०-

ई बी १ अप,
ई बी २ अथ
ई बी ३ मार्गतः
बी ४ नैव
(ए१) हृषीकेश
(ए२) युवयोः
(ए३) द्रष्टुं
(ए४) र्ध्वं

श्रीकृष्ण उवाच :- नान्तो मया महेशस्य दृष्टोऽनन्तस्य कुत्रचित् ।।
वन्द्यस्त्वमसि मे नूनं यः शम्भोरन्तमाप्तवान् ।। २६

इति सम्वदतस्तस्य केशवस्य महात्मनः ।।
आजगाम वृषारूढः शूलपाणिर्महेश्वरः ।। २७

ललाटे भृकुटिं कृत्वा ब्रह्माणमिदमब्रवीत् ।। २८

देवदेव उवाच :- ब्रह्मन् मिथ्यापवादेन सापराधोऽसि मेऽद्य वै ।।
असत्यवादिने तुभ्यं तस्माच्छापं ददाम्यहम् ।। २९

कर्त्ता त्वमसि सर्वेषां लोकानां प्रभुरीश्वरः ।
तथापि सिद्धिकामास्त्वां पूजयिष्यन्ति न प्रजाः ।। ३०

इयं च मच्छिरोभ्रष्टा पुष्पमाला महीतले ।।
असत्यवचनात् पापात् पुंसात् याज्या भविष्यति ।। ३१

ब्रह्माणमर्चयिष्यन्ति ये नराः पापमोहिताः ।।
मालां चेमां धरिष्यन्ति ते न यास्यन्ति मत्पदम् ।। ३२

-०-०-

ख १ विंचः

२ स- पाणिर्महेश्वरः

साधु साधु महाबाहो सत्यप्रिय गदाधर ।
सत्यवाक्यात् परां लोके भवान् पूजामवाप्स्यति ।। ३३

वसिष्ठ उवाच :- इत्युक्त्वा विश्वकर्तारं पुष्पमालां हरिं च स: ।।
स्वकमलव्याधिवर्द्धूप देवदेवास्तिरोदधे ।। ३४

ए १
अथत्रैलोक्यसर्गाय व्याकुले परमेष्ठिनि ।
यथा क्षीरोदधिं कृष्णः स्तुवन् देवमहेश्वरम् ।। ३५

ए २
चातुर्वर्ण्यं विनिर्माय राजन् विश्वमिदं विभुः ।।
गते बहुतिथे काले ब्रह्मा चिन्तितवानिदम् ।। ३६

ब्रह्मा :- असत्यं हि मया प्रोक्तं पुरा लोकविपर्यये ।
सन्निधौ देवदेवस्य समक्षं शार्ङ्गधन्वन: ।। ३७

ए ३
इत्येवाकृततीर्थस्यर्षविवादपराप्यति ।।
कदाचिदपिवेदेवात्सद्भि: पापं कृतं भवेत् ।
तन्मनो व्यथयेन्नित्यं कुक्षिशूलमिवोल्बणाम् ।। ३८

-०-

(ए१) परमेष्टिनि

(ए२) विभू:

(ए३) इ

ततो यास्यामि श्रीतीर्थे क्षेत्रे श्रीमालसंज्ञके ।
आराध्य तं महादेवं करिष्ये शापमोक्षणम् ।। ३९

वसिष्ठ उवाच :- इति ध्यात्वा चिरं कालं ब्रह्मा लोकपितामहः ।
इहागतस्त्वमस्ताम्हुं श्रीमाले श्रीनिकेतने ।। ४०

तत्रागत्य विविक्तेऽसौ भित्त्वासनमचीकरत् ।[ए१]
प्राणायामपरो नित्यं तस्थौ ध्यायन् वृषध्वजम्[बी १] ।। ४१

चतस्त्रो दिश आस्थाय प्राणानायच्छतः क्रमात् ।
रेचके रेणुविक्षेपाज्जातः सेतुः समंततः ।। ४२

अथ प्रीत्या प्रभुः प्राप्ता तत्र देवी सरस्वती ।।
तद्गर्भं पूरयामास विमलैः सलिलैः क्षणात् ।। ४३

स्थितः पयांसि विक्षोभ्य तन्मध्ये कमलासनः ।
कल्याणोदयमाकाङ्क्षन् पद्मकन्द इवप्रभुः ।। ४४

-०-०-

बी १ महेश्वरम्
(ए१) मकरोत्तप

अथ मासाधिके वर्षे ब्रह्मा व्यक्तजन्मन: ।
आगत्य सह पार्वत्या प्रत्यक्षोऽभून् महेश्वर: ।
स्मयमानोऽतिमधुरं वचनंचेदमब्रवीत् ॥ ४५

देवदेव उवाच :- वरं वरय लोकेश यत्ते मनसि वर्त्तते ।
वरद: सर्वदेवानां भवान् किं प्राप्तुमिच्छति ॥ ४६

ब्रह्मोवाच :- असत्यवचनादेव दत्त: शाप: पुरा मम ।
न लोका: पूजयिष्यन्ति त्वां कदाचिदिति प्रभो ॥ ४७

तन्मे शापमपाकर्तुमपकीर्तिकरं परम् ।
प्रसीद देवदेवेश यदि देयो वरो मम ॥ ४८

पूजयन्तु नरा लोका: सर्वार्थस्पृहयालव: ।
देवेन्द्रस्यापि येनेह देवत्वं व्यर्थतां व्रजेत् ॥ ४९

देवदेव उवाच :- मद्वचो न वृथा ब्रह्मन् लोके भवितुमर्हति ।
परमेतं नियंस्यामि स्थानमात्रावलम्बनात् ॥ ५०

-०-

१ इ सवार्थिबांनुकालव:
(ए १) न्ति

यत्र ब्रह्मपुरी ब्रह्मन् यत्र वेदचतुष्टयी
शासितारो द्विजा यत्र तत्र पूज्यो भविष्यसि ।। ५१

एतद् ब्रह्मसरो नाम तीर्थं लोकेष भविष्यति ।। ५२

येऽत्र स्नानं करिष्यन्ति श्रावण्यां सुसमाहिताः ।
कृष्णींश्च तर्पयिष्यन्ति न ते यास्यन्त्यसद्गतिम् ।। ५३

ब्रह्मोवाच :- मदर्थं पद्मपमालासौ शप्ता देव तदा त्वया ।।
तामुद्धरत्व जगन्नाथ यथा वन्द्या भवेम्भुवि ।। ५४

शम्भुरुवाच :- न वृथा सर्वथा शापो भवेन्मम चतुर्मुख ।
तथाप्यनुग्रहं तस्या दास्यामि वचनात्तव ।। ५५

(ए१)
सदा स्वायंभुवे लिंगे पितामह वसाम्यहम् ।।
वृषेण सह गौर्य्या च नन्दिकेशादिभिर्गणैः ।। ५६

स्वायंभुवस्य लिंगस्य पुष्पमालां शिरश्च्युताम् ।
धारयन्तु तथा मूर्तेः स्थापितस्य न तु क्वचित् ।। ५७

-०-०-

ई मे अधिक - यत ब्रह्मपरीब्रह्मन् लोकेभवितुमर्हति ।
परमंतनियंस्यामि स्नानयात्राक्लंबतात् । यत्र ब्रह्मपुरीब्रह्मन् यत्र वेद चतुष्टमी

(ए१) भवे

श्रीमाले येऽर्चयिष्यन्ति भवन्तं कमलोद्भव ।
वियोनिं ते न यास्यन्ति नराः पापशतैरपि ।। ५८

वसिष्ठ उवाचः- इति दत्वा वरान् देवस्तत्रैवान्तरधीयत ।
ब्रह्मापि तत्र भारत्या सार्द्धमंशेन तस्थिवान् ।। ५९

तदाप्रभृति भूपाल तीर्थं ब्रह्मसरोऽभवत् ।।
अत्र दानं प्रशंसन्ति द्विजन्मानः कमण्डलोः ।। ६०

श्रीमाले योऽर्चयेद्राजन् पद्मभूस्तस्य तुष्यति ।। ६१

इति श्री स्कंदपुराणे एकाशीति साहस्र्यां संहितायां-
ब्राह्म्य विभागे तृतीयपरिच्छेदे श्रीमाल माहात्म्ये ब्रह्मसरो
महात्म्यं नाम सप्तदशोऽध्यायः ।। १७ ।।

-०-

ई बी १ तथाचस्त्रक् शुचौराजन् ।
ई बी २ पद्मस्तेनतुष्यति

(ए १) भु